श्रीमत्कृष्णयज्वप्रणीता

मीमांसापरिभाषा

पाठान्तर-टिप्पण्यादिभिः समुल्लसिता

115

श्रीमदिन्दिराकान्तचरणान्तेवासिना

नारायण राम आचार्य 'काव्यतीर्थ'

इत्यनेन संशोधिता

पञ्चमं संस्करणम् : सन १९५०

निर्णयसागर प्रेस, मुंबई

मूल्यं ९ आणकाः

1-00

[All rights reserved by the publisher]

Publisher:-Satyabhamabai Pandurang, } For the 'Nirnaya-sagar' Press,
Printer:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Street, Bombay.



निवेदनम्

इह संसारे संपादनीयेषु चतुर्विधपुरुषार्थेष्वभ्यर्हितत्वेन प्राथमिको **धर्म** एवेतरपुरुषार्थमूलकारणतया विचारणीयत्वेनाद्रियते सम्यगास्तिक-धुरीणैस्तत्र तत्र । स च धर्मो वेदप्रतिपाद्य इति **वेद** एव सर्वस्वमखिलानां धार्मिकाग्रेसराणाम् । वेदस्य च स्वतःप्रमाणभूतस्य पूर्वोत्तरभेदेन स्तो द्वौ भागौ । तत्रोत्तरभागमधिकृत्य प्रवृत्ता **उत्तरमीमांसा** ब्रह्ममीमांसा-परनाम्नी । यां भगवान् **श्रीमद्बेदव्यासः** सूत्ररूपामररचत् भगव-त्पादाचार्यप्रभृतयश्च भाष्यादिभिरपूपुषन् । पूर्वभागमधिकृत्य प्रवृत्ता **पूर्वमीमांसा** यज्ञमीमांसापरनामधेया । यां किलार्वाग्दृष्टिभिर्भ्रमप्रमादादि-दोषदूषितस्वान्ततया दुःशकं वेदस्य याथार्थ्येन तत्त्वमवगन्तुमिति तदर्थ-विचारणाय भगवान् **जैमिनिमहर्षिर्द्वादशाध्यायैः** प्रणिनाय । सेयमव-श्यमुपादेयत्वादखिलशास्त्रमूलत्वाद्ब्रह्ममीमांसातः प्रथममध्येयत्वाच्च केवल-मीमांसाशब्देनापि व्यवहियते । यस्याः परिचयमन्तरा विद्वद्भिरपि न सुलभः शास्त्रार्थनिर्णयः किमुत केवलव्युत्पत्तिमद्भिः । यां विना संशेरतेऽनुक्षणं याज्ञिका वितायमानेषु वितानजातेष्वित्यवश्यं परि-शीलनीया मीमांसा ।

निश्चीयते खलु पूर्वतरैर्विद्वद्वरैरियं कृताधिकतरादरेति तदीयैर्मीमांसो-पोद्बलितै-र्हेमाद्रि-पूर्तकमलाकर—निर्णयसिन्धु-कौस्तुभादिभिर्वसुन्धरामण्डल-मण्डनायमानसंख्यावन्मान्यैर्धर्मशास्त्रनिबन्धरत्नैः । परं सेयं संप्रति भारतवर्षस्य भाग्यविपर्ययाद्दैवव्याकोपाच्च प्रचलितसंप्रदायेषु विशेषतो-ऽर्हणाभावादत्र देशे लुप्तप्राया वा नामशेषेव समजनीति हन्त परि-दूयतेऽधिकतरं नश्चेतः यदनुसवनमनुक्षणं प्रतिशास्त्रं प्रतिधर्मशास्त्र-निबन्धं प्रतियाज्ञिकप्रयोगं च जीवातुभूतं सर्वोपकारकमनर्घ्यं सतत-

कण्ठधार्यं श्रेष्ठरत्नं प्रमादेनावकरोज्झितमिवाभूदित्यास्तां प्रशस्तहानि-विषादजल्पनेन ।

मीमांसाविषयो यद्यपि दुरूहस्तथापि श्रेयोर्थिभिस्तादृशगहनं प्रविविक्षुभिर्व्युत्पित्सुभिरौदासीन्यमुज्झित्वा स्वमतिपरिणामावधि प्रयतितव्यं गुरुकुल उषित्वेति तत्र सर्वान्प्रवणीकर्तुकामैरस्माभिर्यावच्छक्यं मीमांसाशास्त्रस्य पदपदार्थ-संकेतानां ज्ञानाय जिज्ञास्यविषयप्रदर्शकशिरोलेखैः सुविभक्तविषया **श्रीमत्कृष्णयज्वप्रणीता मीमांसापरिभाषा** मुद्रणायोपस्कृतास्ति । यस्या अन्तरान्तरा प्रतिपुटाधः पाठान्तराणि संयोज्य विषमस्थलेषु च विशदीकरणार्था टिप्पण्यपि संयोजितास्ति । यद्यत्राध्यापका अध्येतारश्चादरं विरचयेयुः स्वल्पेनैव कालेनान्यानपि मीमांसाप्रकरण ग्रन्थान्प्रकाशयितुं सोत्साहाः सन्तो दृढबद्धपरिकरा भवेम-इति ।

मीमांसापरिभाषाया विषयानुक्रमः

विषयः	पृष्ठं
मङ्गलम्	१
मीमांसाविषयः	१
वेदद्वैविध्यम्	१
ब्राह्मणवाक्यभेदाः	२
कर्मोत्पत्तिवाक्यम्	२
गुणवाक्यम्	२
फलवाक्यम्	२
फलाय गुणवाक्यम्	२
सगुणकर्मोत्पत्तिवाक्यम् ...	३
सफलकर्मोत्पत्तिवाक्यम् ...	३
प्रयोगविधिः	३
फलापूर्वकल्पना	३
उत्पत्त्यपूर्वकल्पना	४
यजिपदाश्रवणेऽपि यागविधानम्	४
लिङ्प्रत्ययाद्यभावेऽपि विधायकत्वम्	५
त्रिकापूर्वाद्युत्पत्तिः	६
विधित्रैविध्यम्	६
१ अपूर्वविधिः	६
२ नियमविधिः	७
३ परिसंख्याविधिः ...	७
श्रुतिलिङ्गादिषट्प्रमाणानि ...	८
१ श्रुत्युदाहरणम्	८
२ लिङ्गोदाहरणम्	८
३ वाक्योदाहरणम् ...	८
४ प्रकरणोदाहरणम् ...	८
५ स्थानोदाहरणम् ...	९
६ समाख्योदाहरणम् ...	९
श्रुत्यादीनां संनिपाते बलाबलम्	९
लिङ्गादिप्राबल्यविचारः	१०
अङ्गलक्षणम्	१०
अङ्गद्वैविध्यम्	१०
१ संनिपत्योपकारकाणि ...	१०
२ आरादुपकारकाणि ...	११

विषयः	पृष्ठं
कर्मद्वैविध्यम्	११
अर्थकर्मलक्षणम्	११
गुणकर्मद्वैविध्यम्	११
उपयुक्तसंस्कारकम्	११
प्रतिपत्तेस्त्रयः प्रकाराः	१२
यागहोमशब्दार्थः	१२
होमयागयोर्यौगपद्यम्	१२
प्रधानपूर्वकाला प्रतिपत्तिः ...	१३
उपयोक्ष्यमाणसंस्कारभेदाः ...	१३
प्रतिपत्तेर्लक्षणान्तरम्	१३
अर्थगुणकर्मणोः प्राधान्यम् ...	१४
गुणकर्मणश्चातुर्विध्यम्	१४
१ उत्पत्तिसंस्कारः ...	१४
२ आप्तिसंस्कारः	१४
३ विकृतिसंस्कारः	१४
४ संस्कृतिसंस्कारः ...	१४
अर्थकर्मणस्त्रैविध्यम्	१४
१ नित्यम्	१४
२ नैमित्तिकम्	१४
३ काम्यम्	१४
काम्यकर्मणिस्त्रैविध्यम्	१५
वेदस्यालौकिकार्थबोधकत्वम् ...	१५
विधेर्विधायकत्वप्रकारः ...	१५
आर्थी भावना	१६
शाब्दी भावना	१६
भावनाशब्दार्थः	१८
ज्योतिष्टोमादिशब्दानां नामत्व-	
प्रतिपादनम्	१८
नामधेयत्वनिमित्तानि ...	१९
तत्प्रख्यन्यायेन नामत्वम् ...	१९
तद्व्यपदेशन्यायेन नामत्वम्	१९
योगेन नामत्वम्	२०

विषयः	पृष्ठं
विरुद्धत्रिकविचारः	२०
वाक्यभेदभयान्नामत्वम् ...	२१
अर्थवादविचारः	२३
१ निन्दार्थवादः	२३
२ प्रशंसा	२३
३ परकृतिः	२३
४ पुराकल्पः	२३
मन्त्रविचारः	२४
परिसंख्याया दोषत्रयम् ...	२४
विकल्पः	२५
विकल्पे दोषाष्टकम्	२५
एकार्थत्वाद्विकल्पः	२५
वचनबलाद्विकल्पः	२५
स्तोत्रशस्त्रादिस्वरूपम्	२६
व्यवस्थितविकल्पः	२६
कृत्स्नवेदस्य धर्माधर्माख्यार्थे प्रामाण्यम्	२६
स्मृत्यादिप्रामाण्यविचारः ...	२६

विषयः	पृष्ठं
धर्मस्य परस्परं भेदकानि प्रमाणानि	२७
१ शब्दान्तरम्	२७
२ अभ्यासः	२७
३ संख्या	२७
४ संज्ञा	२७
५ गुणः	२७
६ प्रकरणम्	२७
प्रमेयविचारः	२९
क्रत्वर्थपुरुषार्थविचारः	२९
प्रयोजकत्वविचारः	२९
क्रमनिरूपणम्	२९
१ श्रुतिक्रमः	३०
२ अर्थक्रमः	३०
३ पाठक्रमः	३०
४ स्थानक्रमः	३०
५ मुख्यक्रमः	३०
६ प्रवृत्तिक्रमः	३१

मीमांसापरिभाषाया विषयानुक्रमः संपूर्णः ॥



श्रीः

श्रीमत्कृष्णयज्वप्रणीता

मीमांसापरिभाषा

मङ्गलम्

श्रीमते वेदपुरुषाय नमः

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥ १ ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धीमता ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥

मीमांसाविषयः

इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां[1] पूर्वमीमांसायां **धर्माधर्मौ** वेदानुष्ठानोपयोगितया विचारितौ । तत्र वेदबोधितेष्टसाधनताको **धर्मः**; यथा यागादिः । वेदबोधितानिष्टसाधनताकोऽ**धर्मः**; यथा कलञ्जभक्षणादिः[2] । तयोश्च वेदः, स्मृतिः, आचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रं प्रमाणम्; इतरौ तु वेदमूलकतया ।

वेदद्वैविध्यम्

तत्र वेदो द्विविधः—**मन्त्ररूपो ब्राह्मणरूपश्चेति** । तत्र प्रयोगकालीनार्थस्मरणहेतुतया **मन्त्राणा**[3]मुपयोग इति वक्ष्यते । प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः । विधायकं वाक्यं **ब्राह्मणम्** । तच्छेषोऽर्थवादः[1] । तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते ।

टिप्प०—१ श्रीमद्भगवता जैमिनिना द्वादशाध्यायी कर्ममीमांसा 'अथातो धर्मजिज्ञासा' इत्यादिः 'अन्वाहार्ये च दर्शनात्' इत्यन्ता प्रणीता—तत्र धर्मप्रमाणं, धर्मभेदः, शेषशेषिभावः, कृत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषः, श्रुत्यर्थपाठादिक्रमभेदः, अधिकारविशेषः, सामान्यातिदेशः, विशेषातिदेशः, ऊहः, बाधः, तन्त्रम्, प्रसङ्गश्च इति क्रमेण द्वादश लक्षणानि सन्तीति पूर्वमीमांसा द्वादशलक्षणीत्युच्यते. २ विषलिप्तबाणहतमृगमांसं कलञ्जमित्यभिधीयते. प्राभाणिकास्तु 'रक्तलशुनं' इति मन्वते. ३ प्रयोगसमवेतार्थस्मारका मन्त्राः.

पाठा०—1 ब्राह्मणशेषश्चार्थवादः.

ब्राह्मणवाक्यभेदाः

ब्राह्मणवाक्यं चानेकविधम्—**कर्मोत्पत्तिवाक्यं, गुणवाक्यं, फलवाक्यं, फलाय गुणवाक्यं, सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात्** ।

कर्मोत्पत्तिवाक्यम्

तत्र येन वाक्येन 'इदं कर्म कर्तव्यम्' इति बोध्यते तत् **कर्मोत्पत्तिवाक्यम्**; यथा 'अग्निहोत्रं जुहोति' इति । अत्राग्निहोत्रहोमः कर्तव्यतया विधीयत इति कर्मोत्पत्तिवाक्यमिदम् ।

गुणवाक्यम्

विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं **गुणवाक्यम्**; यथा 'दध्ना जुहुयात्' इति । अत्र होममुद्दिश्याऽङ्गतया दधि विधीयत इति गुणवाक्यमिदम् । कर्माङ्गतया विहितत्वमेव दध्यादेर्**गुणत्वम्** । अत्र होमस्योद्देश्यत्वं नाम मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम् । तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम्, दध्यादिगुणान्वयितया प्राधान्यं च । दध्यादेर्मानान्तराप्राप्तत्वादत्रैव **विधेयत्वम्**, होमसाधनत्वाच्च होमापेक्षया **गुणत्वम्**, पुरुषेणानुष्ठीयमानत्वादुपादेयत्वं चेति । अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञातत्वम्, अप्राप्तत्वं चाज्ञातत्वमिति बोध्यम् ।

फलवाक्यम्

उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसंबन्धबोधको विधिः **फलविधिः**; यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति । अत्र 'यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत्—कुर्यात्' इति अग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसंबन्धो बोध्यत इति फलवाक्यमिदम् ।

फलाय गुणवाक्यम्

प्राप्तं कर्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यम्—यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इति । अग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुणो विधीयते—'होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेत्' इति । होमाश्रितेन होमकारकीभूतेनेत्यर्थः । अयमेव **गुणफलविधिः, गुणकामविधि**रिति चोच्यते ।

पाठा०—1 विधिरपि.

सगुणकर्मोत्पत्तिवाक्यम्

द्रव्यदेवतादिगुणविशिष्टकर्मविधायकं वाक्यं **सगुणकर्मोत्पत्तिवाक्यम्**; यथा 'सोमेन यजेत' इति । अत्र सोमलताविशिष्टो यागो विधीयते । विशिष्टविधावपि विशेषणस्यार्थाद्विधिः ।

सफलकर्मोत्पत्तिवाक्यम्

क्वचित्कर्मोत्पत्तिवाक्यमेव **फलसंबन्धबोधकमपि** भवति; यथा 'उद्भिदा यजेत पशुकामः' इति । अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयत इत्येकमेवेदं वाक्यं फलसाधनर्याागविधायकम् ।

प्रयोगविधिः

प्रधानविधिरेवाङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् **प्रयोगविधिरित्युच्यते**; यथा 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इति । अत्र 'अग्निहोत्रहोमेन स्वर्गं भावयेत्' इत्यर्थः प्रतीयते । भावयेत् उत्पादयेदिति यावत् । अत्र 'कथमनेन होमेन स्वर्गं कुर्यात्' इति कथंभावाकाङ्क्षा जायते; यथा 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते भवत्याकाङ्क्षा 'कथमनेन द्वैधीभावं कुर्यात्' इति । तत्रोद्यमननिपातनादिसहायेनेति गम्यते, तद्वदत्रापि 'अग्निं प्रणयति', 'अग्निषु समिध आदधाति' इत्याद्यङ्गविधिविहितप्रणयनसमिदाधानायतनशोधनादिकाङ्गकलापजनितोपकारसहितेनाऽग्निहोत्रहोमेन स्वर्गं कुर्यादिति प्रकरणकल्पितेन होमवाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इत्येतादृशः **प्रयोगविधिः** । अङ्गजातमेवेत्थंभाव इति, **इतिकर्तव्यता** इति चोच्यते । अत्राग्निहोत्रहोमः **प्रधानं**, प्रणयनादिकं सर्वमङ्गम् ।

फलापूर्वकल्पना

नन्विदमनुपपन्नम्; आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरिति चेत्,—**मैवम्**; विहितनिषिद्धकर्मणां तत्तद्वा-

---

टिप्प०—१ अत्र हस्तेनोद्यम्य निपात्येति तयोरन्वयः. २ गार्हपत्यादाहवनीयाद्यायतनेऽग्निं नयति. ३ अङ्गसमूहः. ४ कर्तव्यस्य इति प्रकार इतिकर्तव्यता.

पाठा०—1 यागकर्मविधा. 2 कुर्यादिति.

क्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालान्तरभावि-फलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते । ततश्च यागा-देरपूर्वद्वारा स्वर्गसाधनत्वं, न साक्षात् । तदेव फलापूर्वम् । [2]तत्करणत्वं च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य । प्रधान-मात्रादेव फलापूर्वजनने फलस्यापि ततैं एव सिद्धेरङ्गानामानर्थक्यापत्तेः ।

उत्पत्त्यपूर्वकल्पना

ननु सर्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमयुक्तम्, तच्चाशुतरविना-शिनः प्रधानस्याङ्गसाहित्याभावान्न [3]संभवतीति चेत्;—**नः**; प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसंभवात् । प्रधानस्य **सर्वाङ्गसाहित्यसिद्ध्यर्थं** प्रधानकर्म-परमापूर्वयोर्मध्ये प्रधानमात्रजन्य-**मुत्पत्ति**नामकं किंचिदपूर्वमस्तीत्यङ्गीकारात् । एवमङ्गानामपि परस्पर-सहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात्तत्त**दुत्पत्त्य-पूर्वद्वारा साहित्यं** बोध्यम् । अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव । **दर्शपूर्णमासयोस्तु विशेषः** 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इत्याग्नेययागो विहितः, 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' इत्यग्नीषोमीययागो विहितः, 'उपांशुयाजमन्तरा यजति' इत्युपांशुयागः 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इति वाक्यात्पौर्णमास्यां विहितः । एतानि **पौर्णमास्यां प्रधानानि ।** एषामाग्नेयाग्नीषोमीयोपांशुयाजानां [1]तत्तद्वाक्यावगतपौर्णमासीकालसंबन्धं निमित्तीकृत्य 'य एवं विद्वान्पौर्णमासीं यजते' इति विद्वद्वाक्ये पौर्ण-मासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र यत्र पौर्णमासीशब्दस्तत्रतत्राग्नेयादिसमुदायोपस्थितिः ।

यजिपदाश्रवणेऽपि यागविधानम्

ननु 'यदाग्नेयम्' इति वाक्ये यागवाचकपदस्याश्रवणात्कथं याग-विधायकत्वमिति चेत्,—**मैवम्**; अग्निर्देवता अस्य पुरोडाशस्येत्यर्थे

टिप्प०—१ तत् फलापूर्वम्. २ प्रधानमात्रादेव. ३ वैशिष्ट्यं न संभवतीत्यर्थः.

पाठा०—1 याजानां.

विहितदेवतातद्धितान्त 'आग्नेय'शब्दः। तस्य पुरोडाशपदसामानाधिकरण्याद्द्रव्यदेवतासंबन्धोऽवगतः। स यागमन्तरा न संभवति, द्रव्यदेवतासंबन्धस्य यागादन्यत्र क्रियायामसंभवात् यागक्रियायामेव संबन्धो वाच्यः। देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात्[1]। अतः श्रुतद्रव्यदेवतासंबन्धानुमितो यागो यजेतेति कल्पितपदेन विधीयते—अग्निदैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेनेष्टं भावयेदिति, एवं यत्र यत्र द्रव्यदेवतासंबन्धमात्रं श्रूयते 'सौर्यं चरुं निर्वपेत्' इत्यादौ, तत्र सूर्यदेवताचरुद्रव्यसंबन्धानुमितो यागो विधीयत इति न कश्चिद्दोषः।

लिङ्प्रत्ययाद्यभावेऽपि विधायकत्वम्

ननूपांशुयागवाक्ये यजेः श्रवणेऽपि विधिप्रत्ययलिङादेरभावात्कथं विधायकत्वमिति चेत्,—**मैवम्**; 'यजति' इत्यस्य 'यजेत'इति **विपरिणामेन** विधायकत्वसंभवात्। एवं 'व्रीहीन् प्रोक्षति', 'समिधो यजति' इत्यादावपि[3] **विपरिणामो** बोध्यः। **केचित्तु**—'यजति'इत्यस्य पञ्चमलकारत्वाङ्गीकाराद्विधायकत्वसंभव इत्याहुः।

तथा 'ऐन्द्रं दध्यमावास्यायां' 'ऐन्द्रं पयोऽमावास्यायाम्' इति वाक्यविहितौ, सांनाय्ययागौ[1] 'यदाग्नेयम्—' इति वाक्यविहिताग्नेयश्चामावास्यायां **प्रधानानि**।

एतेषां त्रयाणां 'य एवं विद्वानमावास्यां यजते' इति वाक्ये अमावास्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः। तेन वेदे यत्र 'दर्श'शब्दः 'अमावास्या'शब्दो वा श्रुतस्तत्र यागसमुदायोपस्थितिः। त्रिकस्य त्रिकस्यामावास्यापौर्णमासीशब्दाभ्यां समुदायरूपेण विद्वद्वाक्येऽ**नुवादस्य** प्रयोजनं तु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ द्विवचनोपपत्तिः; अन्यथा षण्णामाग्नेयादियागानां बहुत्वात् 'दर्शपूर्णमासैः' इति बहुवचनं स्यात्। मानान्तरेण प्राप्तार्थस्य[4] पुनःश्रवण**मनुवादः**।

टिप्प०–१ सांनाय्यं दधिपयसी। एतौ च सोमयाजिन एव। असोमयाजिनस्तु ऐन्द्राग्नोपांशुयाजौ।

पाठा०–1 यागत्वरूपत्वा. 2 एवं यत्र लिङादिर्न श्रूयते 'व्रीहीन्'. 3 इत्यादौ तत्र विपरि. 4 प्राप्तस्यार्थस्य.

तथा फलवदाग्नेयादिसंनिधावाम्नातानि प्रयाजाज्यभागानुयाजादीनि षण्णां यागानामङ्गभूतानि ।

त्रिकापूर्वाद्युत्पत्तिः

एवं स्थिते 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्यायमर्थः—दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति । तत्र कथं कालद्वयवर्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्रिकादेकैक**मपूर्वं** जायते, तद्द्वारा द्वयोः समुदाययोः **साहित्य**मुच्यते । एकैकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानुयाजादिपूर्वोत्तराङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्य **समुदायापूर्वजनकत्व**मुच्यते । एकैकत्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न संभवतीति त्रिभिर्यागैस्त्रीण्युत्**पत्त्यपूर्वाणि** जायन्ते, तद्द्वारा सर्वाङ्गसाहित्यम् । अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारा **साहित्यं** वाच्यम् । तथा च प्रधानजन्योत्पत्त्यपूर्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानाम**ङ्गविशिष्टत्वरूपं साङ्गत्वम्** । एवं च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः **समुदायापूर्व**मेकं जन्यते, तथा दर्शेऽपि आग्नेयैन्द्रद्वयजन्यस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं **त्रिकापूर्वं** जन्यते, ताभ्यां त्रिकापूर्वाभ्यां आग्नेयाद्युत्पत्त्यपूर्वत्रितयजन्याभ्यां फलजनकीभूतं महापूर्वं **फलापूर्वनामकं** जन्यते, ततश्च फलमिति । तथा च सर्वाङ्गोपकृताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वनिष्पत्तये साङ्गप्रधानकर्तव्यताबोधको विधिः **प्रयोगविधि**रिति सिद्धम् ।

विधित्रैविध्यम्

पुनरपि **विधिस्त्रिविधः—अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति** ।

अपूर्वविधिः

तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सः **अपूर्वविधिः**—यथा दर्शपूर्णमासप्रकरणे 'व्रीहीन् प्रोक्षति' इति । एतद्विध्यभावे दर्शपूर्णमासीय-

टिप्प०–१ विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते.

व्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तु तत्संबन्धि-व्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः ।

नियमविधिः

यश्च पक्षे प्राप्तमर्थं नियमयति स **नियमविधिः**—यथा तत्रैव 'व्रीहीनवहन्ति' इति । एतद्विध्यभावे दर्शपौर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्यायाऽवहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति, तस्मिन्पक्षेऽवहननस्य प्राप्तेरभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् । सति त्वस्मिन्विधौ अवहननेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति **नियमविधिरयम्** ।

नच वैतुष्यस्य नखविदलनेनापि संभवादवहननियमो व्यर्थः, प्रयोजनाभावादिति वाच्यम् । अवघातेनैव वैतुष्यकरणे किंचिददृष्टं जन्यत इति नियमादृष्टाङ्गीकारात्, नियमेन दृष्टकार्यालाभेऽप्यदृष्टस्योत्पत्तेः । तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते; तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम् । एवं सोमक्रयादिनियमेऽपि बोध्यम् ।

परिसंख्याविधिः

द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः **परिसंख्याविधिः**—यथा चयनप्रकरणे 'इमामगृभ्णन्[3] रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः । एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो रशनाऽऽदानप्रकाशनसामर्थ्यरूपाल्लिङ्गादश्वरशनाऽऽदान इव गर्दभरशनाऽऽदानेऽपि प्रामुयात् । सत्यस्मिन्विधौ अनेन मन्त्रेणाश्वरशनामेवाददीत, नतु गर्दभरशनाम्; सा तु तूष्णीमेव ग्राह्येति गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलकत्वादयं **परिसंख्याविधिः**। एवं 'पञ्च पञ्चनखा भक्ष्याः' इत्यादावपि बोध्यम् ।

टिप्प०–१ नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः. २ सोमक्रीणातीत्यादिषु. ३ ऋतस्य सत्यफलसाधनभूतस्य यज्ञस्य अगृभ्णन् गृहीतवन्तः। 'हृग्रहोर्भश्छन्दसि' (वा०४८२३) इति हस्य भः । अत्र अश्वाभिधानीमिति द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्.

श्रुतिलिङ्गादिषट्प्रमाणानि

पूर्वं **दर्शपूर्णमासाङ्गत्वं** प्रयाजादीनामुक्तम्। तत्राङ्गत्वबोधकप्रमाणानि—श्रुति[1]-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या-भेदेन षट्।

श्रुत्युदाहरणम्

तत्र 'दध्ना जुहुयात्'इत्यत्राऽग्निहोत्रवाक्यप्राप्तं होमं जुहुयादित्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयत इति श्रुत्या दध्नोऽङ्गत्वम्।

लिङ्गोदाहरणम्

लिङ्गं नाम सामर्थ्यम्[2]। तच्च द्विविधम्—**अर्थगतं शब्दगतं** चेति। —आद्यं यथा 'स्रुवेणावद्यति'इत्यवदानसामान्यशेषत्वावगमेऽपिस्रु वस्य सामर्थ्यरूपालिङ्गादाज्यसांनाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गत्वम्; स्रुवेण पुरोडाशावद्यवदानस्य कर्तुमशक्यत्वात्। **शब्दगतं** तु लिङ्गं अर्थप्रकाशनसामर्थ्यम्। यथा 'अग्नये त्वा जुष्टं निर्वपामि'इति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपालिङ्गान्निर्वापाङ्गत्वम्। यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यं[3] तस्य तदङ्गत्वम्। यथा 'बर्हिर्देवसदनं दामि'इति मन्त्रस्य बर्हिर्लवनप्रकाशनसामर्थ्यमिति शब्दसामर्थ्यरूपालिङ्गाद्दर्भलवनाङ्गत्वम्[4] ॥

वाक्योदाहरणम्

पदान्तरसमभिव्याहारो[5] **वाक्यम्**—यथा 'इषे त्वेति छिनत्ति'इति। अत्र छेदनाङ्गत्वेन 'इषे त्वा'इति मन्त्रो वाक्येन विधीयते। यद्वा 'अग्नये त्वा जुष्टम्'इत्यत्रैव अग्नये त्वा जुष्टमित्यादीनां पदानां 'निर्वपामि'इत्यनेनैकवाक्यतापन्नत्वान्निर्वापाङ्गत्वम्।

प्रकरणोदाहरणम्

प्रकरणं नाम परस्पराकाङ्क्षा—यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'इति। अत्र 'दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कुर्यात्'इत्युक्ते भवत्याकाङ्क्षा—कथमाभ्यां स्वर्गापूर्वं कर्तव्यमिति। तथा फलवदाग्नेयादिसं-

---

टिप्प०—१ श्रुतिर्नाम निरपेक्षोऽङ्गत्वबोधकः शब्दो विभक्त्यादिरूपः. २ सामर्थ्य सर्वभावानां लिङ्गमित्यभिधीयते इति. ३ यो मुख्योऽर्थ इत्यर्थः। तेन गौणार्थव्यवच्छेदः. ४ हे देव, बर्हीरूपं तव सदनं दामि लुनामि 'दापृ लवने'. ५ न तूलपलवनाङ्गत्वमिति शेषः. ६ समभिव्याहारो नाम सहोच्चारणम्. तच्च साध्यत्वादिवाचकद्वितीयाद्यभावे शेषवाचकपदस्य शेषिवाचकेन. ७ हे पलाशशाखे, त्वा त्वां इषे अन्नाय छिनद्मीति मन्त्रार्थः. ८ पृथक्कृत्य स्थापयामीत्यर्थः.

निधौ 'समिधो यजति', 'तनूनपातं यजति', 'आज्यभागौ यजति'इत्यादिभिः प्रयाजादयः फलरहिताः श्रुताः, तेषां स्ववाक्येषु फलाश्रवणाद्भवति प्रयोजनाकाङ्क्षा—किमेतेषां प्रयोजनमिति । ततश्च प्रयाजादीनां प्रयोजनाकाङ्क्षायां दर्शपूर्णमासयोः कथंभावाकाङ्क्षायां परस्पराकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वं निश्चीयते ।

स्थानोदाहरणम्

स्थानं नाम संनिधिः; यथा सांनाय्यपात्रसंनिधौ 'शुन्धध्वम्'[2] इति मन्त्रस्य पाठात् संनिधानात्सांनाय्यपात्रप्रोक्षणाङ्गत्वम् ।

समाख्योदाहरणम्

समाख्या यौगिकी संज्ञा; यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते आध्वर्यवसमाख्यावशादध्वर्योः कर्तृत्वेनाङ्गत्वम्, तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्यातेष्वैन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् 'उभा वामिन्द्राग्नी' इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः । विनियोगो नामाङ्गत्वेनान्वयः ।

श्रुत्यादीनां संनिपाते बलाबलम् ।

[3]श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यमुत्तरोत्तरस्य दौर्बल्यम् । यथा 'कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यग्निहोत्रप्रकरणे श्रूयते । तत्र मन्त्रस्येन्द्रप्रकाशनसामर्थ्यरूपालिङ्गादिन्द्रोपस्थानाङ्गत्वे प्राप्ते 'ऐन्द्र्या'इति तृतीयाश्रुत्या 'गार्हपत्यम्'इति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानाल्लैङ्गिक इन्द्रोपस्थाने विनियोगो बाध्यते । श्रुतिर्हि स्वतो विनियोजिका । **लिङ्गं** त्विन्द्रप्रकाशनसामर्थ्यमालोच्य ऐन्द्र्येन्द्रमुपतिष्ठते' इति श्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम्; तच्चात्र न संभवति । यत्र श्रुतिविनियोगो नास्ति 'अग्नये जुष्टं निर्वपामि' इत्यादौ, तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमा-

---

टिप्प०–१ सांनाय्यं दधिपयसी. २ 'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' इति मन्त्रस्वरूपम्. ३ श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानाम्. ४ अत्र 'घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति मन्त्रशेषः.

लोच्य 'अनेन मन्त्रेण निर्वापं कुर्यात्'इति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव श्रुतिकल्पनाप्रतिबन्धकाभावात् ।

लिङ्गादिप्राबल्यविचारः

तथा 'स्योनं ते सदनं कृणोमि' 'तस्मिन्सीद'इत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानाद्वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति, **लिङ्गेन** तु भिन्नमन्त्रत्वं भाति । आद्यस्य सदनप्रकाशनसामर्थ्यात् 'तस्मिन्सीद'इत्यस्य सादनप्रकाशकत्वात् । तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद्वाक्यं बाधित्वा लिङ्गेन 'स्योनं ते' इत्यस्य सदनाङ्गत्वं 'तस्मिन्सीद' इत्यस्य सादनाङ्गत्वमिति निर्णयः । 'स्योनं ते' इत्यस्य 'तस्मिन्सीद'इत्यनेनैकवाक्यत्वबलाद्यथाकथंचित्सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा 'अनेन विशिष्टमन्त्रेण सादनं कुर्यात्'इति श्रुतिः कल्पनीया । सदनप्रकाशनरूपप्रत्यक्षलिङ्गेन कल्पितया 'स्योनं त इत्यनेन सदनं कुर्यात्'इति श्रुत्या 'स्योनं ते' इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्ष्याद्वाक्यप्रमाणालिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्वादिति लिङ्गेन वाक्यस्य बाधः । एवं वाक्येन प्रकरणस्य, प्रकरणात्क्रमस्य, क्रमात्समाख्यायाश्च बाधो वेदितव्यः । तथा श्रुत्या वाक्यादेरपि बाधः । तदेवमङ्गताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि ।

अङ्गलक्षणम्

तच्चाङ्गत्वं **शेषत्वम्** । **पारार्थ्यं**मिति यावत् । परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं **पारार्थ्यम्** । प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वाल्लक्षणसङ्गतिः । दर्शादेः प्रयाजाद्युद्देशेन प्रवृत्तकृतिविषयत्वाभावान्नातिव्याप्तिः । केवलप्रयाजानुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः ।

अङ्गद्वैविध्यम्

तान्यङ्गानि द्विविधानि—संनिपत्योपकारकाणि, आरादुपकारकाणि चेति ।

यान्यङ्गानि साक्षात्परम्परया वा प्रधानयागशरीरं निष्पाद्य तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि **संनिपत्योपकारकाणि;** यथा व्रीह्या-

पाठा०–1 अङ्गत्वं पारार्थ्यं.

द्विद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि, अग्न्यादिदेवतात्तत्संयुक्तया-ज्यानुवाक्यावचनादीनि च। अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा, अवहननादेस्तुषविमोकादिरूपदृष्टद्वारा, व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं, तद्वारा यागशरीरतदुत्पत्त्यपूर्वहेतुत्वं च। याज्यानुवाक्यादेर्देवता-संस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं, तद्वारा तदुत्पत्त्यपूर्वोपयोगित्वं च। यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात् 'द्रव्यदेवते हि यागस्वरूपम्'इति सिद्धान्ताच्च। एतान्येव **सामवायिकानी**त्युच्यन्ते।

आत्मसमवेतापूर्वजनकान्या**राद्उपकारकाणि**—यथा प्रयाजाज्यभागानूयाजादीनि। एतानि द्रव्यगतं देवतागतं वा संस्कारं न जनयन्ति, किंत्वात्मगतमदृष्टं जनयन्तीत्याराद्उपकारकाणि।

कर्मद्वैविध्यम्

तत्र [1]सामान्यतः **कर्म द्विविधम्—अर्थकर्म, गुणकर्म चेति।**

अर्थकर्मलक्षणम्

तत्र आत्मगतापूर्वजनकं कर्माऽ**र्थकर्म**—यथाऽग्निहोत्रदर्शपूर्णमासप्रयाजादिकम्।

गुणकर्मद्वैविध्यम्

गुणकर्म संस्कारजनकम्। **तच्च द्विविधम्—उपयुक्तसंस्कारकं, उपयोक्ष्यमाणसंस्कारकं च।**

उपयुक्तसंस्कारकम्

तत्र उपयुक्तसंस्कारकं **प्रतिपत्तिकर्म**। 'उपयुक्तस्य [2]आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्ति'रिति लक्षणात्। यथा इडाभक्षणकृष्णविषाणाप्रासन—चतुरवत्तहोमादिकम्।

नन्विडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात्प्रतिपत्तित्वं युक्तम्, होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावा-

---

टिप्प०—१ सामान्यतो नाम अङ्गप्रधानरूपम्. नतु केवलमङ्गरूपम्. २ द्रव्यस्याकीर्णकरत्वं नाम तस्य प्रयोजननिर्वर्तनोत्तरं किंचिदकुर्वतोऽन्तरावस्थानेन कार्यकारिणां संचारादावन्तरायकरत्वम्.

त्कथं प्रतिपत्तित्वम्, होमस्य यागसमानकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति चेत्। **अत्राहुः—उपयुक्तसंस्कार-मात्रं प्रतिपत्तिः**, नतु प्रधानयागोपयुक्तत्वम्। तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्तव्यलोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्, यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात्। तथा कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात्, यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात्। अतो यत्र क्वचनोपयोगमात्रं विवक्षितम्, यत्र क्वचिदुपयोगस्त्वत्राप्यस्ति, वपाहृदयाद्युद्धरणेनोपयुक्तस्य पशोः संबन्धिनः शकृल्लोहितस्याऽऽकीर्णकरस्य प्रतिपत्त्यपेक्षत्वात्। एवं यथाकथंचिदुपयोगो होमस्थलेऽप्यस्ति।

तथा हि, **प्रतिपत्तिस्त्रिधा—प्रधानोत्तरकाला, प्रधानसमकाला, प्रधानपूर्वकाला चेति**। **तत्राद्या** इडाभक्षणादिका। **द्वितीया** होमादिका। तथा हि—दर्शपूर्णमासप्रकरणे श्रूयते 'सकृदुपस्तृणाति' द्विर्हविषोऽवद्यति,' 'सकृदभिघारयति', 'चतुरवत्तं जुहोति' इति। तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते, होमस्याप्राप्तत्वेनानुवादासंभवात्।

नच 'यदाग्नेय'वाक्याद्धोमप्राप्तिः; तद्वाक्यस्य यागविधायकत्वात्। **नच** यागहोमयोरभेद इति वाच्यम्; देवतोद्देशेन द्रव्यत्यागस्य **याग**शब्दार्थत्वात्। प्रक्षेपस्य **होम**शब्दार्थत्वात्। तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपस्य शक्त्याऽप्राप्तत्वेनानुवादासंभवात्, किंतूपस्तरण-द्विरवदाना-ऽभिघारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते। स च संस्कारः प्रतिपत्तिरूप एव। अग्नये जुष्टमभिघारयामि'इत्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथंचिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षया तदवयवद्यवदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात्।

स च संस्कारः प्रधानसमकालः। होमो हि 'वषट्कृते जुहोति'इति विधानाद्वषट्कारोत्तरक्षणे अध्वर्युणा कर्तव्यः। **यागोऽपि तस्मिन्नेव क्षणे**

यागस्मरणार्थेन वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसंभवात्। तदिदं सर्वप्रदानाधिकरणवार्तिके स्थितम्।

प्रधानपूर्वकाला प्रतिपत्तिर्यथा—'शकृत्संप्रविध्यति' 'लोहितं निरस्यति' इति शकृत्संप्रवेधनलोहितनिरसने। इदमपि 'पशावनालम्भालोहितशकृतोरकर्मत्वम्' इत्यधिकरणे स्थितम्।

उपयोक्ष्यमाणसंस्कारभेदाः

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः—साक्षाद्विनियुक्तसंस्कारः। साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः, विनियोक्ष्यमाणसंस्कारश्चेति। तत्र आद्यो यथा—'व्रीहीनवहन्ति' इत्यादिः। 'व्रीहिभिर्यजेत' इति वाक्यविनियुक्तव्रीहीणामवहननसंस्कारः॥ **द्वितीयो** यथा—'वत्समालभेत'[3] इति। दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्योपकारको यो वत्सः तत्संस्कारकमिदमालम्भनम्॥ **तृतीयो** यथा—'तप्ते पयसि दध्यानयति' इति। अत्र 'सा वैश्वदेव्यामिक्षा' इति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत्पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनम्। पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः, त्यागांशे अदृष्टार्थश्च। अत्र तत्संस्कार्याग्नीषोमदेवताया वपायागे उपयुक्तार्थत्वात् हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च। स्विष्टकृद्यागो द्रव्यांशे देवतांशे चोपयुक्तसंस्कारार्थः, त्यागांशे अदृष्टार्थश्च। सूक्तवाकसाधनं प्रहरणमपि तथैव। उत्तमप्रयाजो यक्ष्यमाणदेवतासंस्कारत्वात्तदंशे उपयोक्ष्यमाणसंस्कारः, इतरांशे अदृष्टार्थः। हृदयादिहविर्यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिः, इतरांशे अदृष्टार्थ इत्याद्यूह्यम्।

प्रतिपत्तेर्लक्षणान्तरम्

केचित्तु—उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं **प्रतिपत्तिकर्मत्वम्**। चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमानन्तरमुपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसंगतिरित्याहुः।

टिप्प०—१ पूर्वमीमांसातृतीयाध्यायचतुर्थपादस्य चतुर्दशेऽधिकरणस्य सप्तत्रिंशसूत्रस्य. २ पूर्वमीमांसाचतुर्थाध्यायप्रथमपादे द्वादशाधिकरणे सप्तविंशे सूत्रे. ३ आलभेतेत्यत्र आलम्भनं स्पर्श इत्यर्थः.

अर्थगुणकर्मणोः प्राधान्यम्

अत्रायं विशेषः—अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यम् । कर्मणि द्रव्यस्य गुणत्वम् । यथाऽग्निहोत्रादौ दध्यादेर्गुणत्वम् । गुणकर्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्मणो गुणत्वम् । 'व्रीहीन् प्रोक्षति, अवहन्ति' इत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वमिति ।

गुणकर्मणश्चातुर्विध्यम्

पुनरपि गुणकर्म चतुर्विधम्—उत्पत्ति-आप्ति-विकृति-संस्कृतिभेदात् ।

तत्रोत्पत्तिसंस्कारो यथा—'अग्नीनादधीत' इति । मन्त्रविशेषैः संभारेषु निधापिता अप्याहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारत्वादाधानस्य उत्पत्तिसंस्कारत्वम् ॥

आप्तिसंस्कारो यथा—'स्वाध्यायोऽध्येतव्यः' इति । अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम् ॥

विकृतिर्यथा—'व्रीहीनवहन्ति' इति व्रीहिगतवैतुष्यरूपविकृतिजनकत्वादवहननं विकृतिसंस्कारकम् ॥

संस्कृतिर्यथा—'व्रीहीन् प्रोक्षति' इति । [अत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात्संस्कृतिरूपगुणकर्मत्वम् ।] अत्राधानमध्ययनं च स्वतन्त्रं गुणकर्म, नतु क्रत्वङ्गम् । प्रोक्षणादिकं सर्वं क्रत्वङ्गं गुणकर्मेति ध्येयम् ।

अर्थकर्मणस्त्रैविध्यम्

अर्थकर्म त्रिविधम्—नित्य-नैमित्तिक-काम्यभेदात् ।

तत्र 'यावज्जीवमग्निहोत्रं जुहोति', 'सायं जुहोति', 'प्रातर्जुहोति' इति जीवता पुरुषेण सायंप्रातःकालयोर्नियमेन कर्तव्यतयाऽवगतमग्निहोत्रादिकं **नित्यम्** ।

'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इति दर्शपूर्णमासातिपत्तिनिमित्तकपथिकदिष्ट्यादिकं **नैमित्तिकम्** ।

नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव । कृते फलं नास्तीति **केचित्** ।

अन्ये तु—दुरितनिवृत्तिः फलमस्ति; 'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्' इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात्।

नचैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति वाच्यम्; फलकामनापूर्वकानुष्ठानाभावात्। तत्तद्विधिवाक्ये फलकाममुद्दिश्य तदर्थफलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः।

काम्यकर्मणस्त्रैविध्यम्

काम्यमपि कर्म त्रिविधम्—केवलमैहिकफलकम्, आमुष्मिकफलकम्, ऐहिकामुष्मिकफलकं चेति। [1] **तत्राद्यं यथा**—कारीर्यादि। तत् तत्समयवर्तिशुष्यत्सस्यसंजीवनहेतुवृष्टिकामिना क्रियते, न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा॥

केवलामुष्मिकफलकं यथा—[2]स्वर्गाद्यर्थं दर्शपूर्णमासादिकम्। स्वर्गस्य [3]इहलोकभोग्यत्वाभावात्॥

ऐहिकामुष्मिकसाधारणफलकं यथा—[4]'वायव्यं श्वेतमालभेत भूतिकामः' इति भूत्यादिफलकमित्यन्यत्र विस्तरः।

वेदस्यालौकिकार्थबोधकत्वम्

ननु दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणां च प्रत्यक्षत्वेन लौकिकत्वात्कथं वेदस्यालौकिकार्थबोधकत्वमिति चेत्,—न; कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्वमप्रत्यक्षमिति 'तत्फलसाधनतया तत् कर्म कर्तव्यम्' इत्येवं फलसाधनतया कर्मकर्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधकत्वात्। एवं व्रीह्यादीनां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः।

विधेर्विधायकत्वप्रकारः

इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते। तत्र 'स्वर्गकामो यजेत' इत्यत्र यजिधातोरुपरितने तप्रत्यये धर्मद्वयमस्ति—**आख्यातत्वं, लिङ्त्वं चेति।** तत्राख्यातत्वं [5]सर्वलकारसाधारणम्, [1]तदवच्छेदेन लिङ्[2]प्रत्ययः पुरुषप्रवृत्तिरूपामर्थभावनां प्रतिपादयति।

टिप्प०–१ तेन रूपेणेत्यर्थः. २ तप्रत्यय इत्यर्थः.

पाठा०–1 मुष्मिकसाधारणफलकं. 2 स्वर्गाद्यर्थदर्श°. 3 एतल्लोक. 4 मुष्मिकफलकं. 5 दशलकारतिङर्थक्रिया.

आर्थी भावना

सा चार्थभावना किं, केन, कथमिति अंशत्रयविशिष्टा । तथा हि—यजेतेत्यत्र प्रथमं प्रत्ययेन 'भावयेत्' इति प्रतीयते । सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात् । तत्र च प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात्प्रथमं प्रत्ययार्थभावनाया उपस्थितिर्युक्ता । ततः करोति—समानार्थकभावयतेः सकर्मकत्वात् 'किं भावयेत्' इति कर्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति । भाव्यत्वेन कर्मत्वेनेत्यर्थः । साध्यत्वेनेति यावत् । नतु समानपदोपात्तोऽपि धात्वर्थो भाव्यत्वेनान्वेति । दुःखात्मकस्य यागस्येप्सिततमत्वरूपकर्मत्वायोग्यत्वात् । स्वर्गस्य त्वानन्दात्मत्वेनेप्सिततमतया कर्मत्वेनान्वययोग्यत्वात् । ततश्च 'स्वर्गं भावयेत्' इति बोधो भवति । ततः 'केन' इति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति—'यागेन स्वर्गं कुर्यात्' इति । ततः 'कथं यागेन स्वर्गं कुर्यात्' इति कथंभावाकाङ्क्षायाम्—अग्न्याधानावहननादिजन्यदृष्टोपकारेण प्रयाजादिजनितादृष्टोपकारेण च सहितेन यागेन स्वर्गं कुर्यादिति अग्न्याधानप्रयाजादिकमङ्गजातमितिकर्तव्यतयान्वेति । कथंभावाकाङ्क्षापूरकत्वमितिकर्तव्यतात्वम् । यथा 'ओदनकामः पचेत्' इत्यत्र लिङा भावना प्रतीयते । 'किं भावयेत्' इत्याकाङ्क्षायां ओदनो भाव्यत्वेनान्वेति, 'केन' इत्याकाङ्क्षायां पाकेनेति लभ्यते, 'कथम्' इत्याकाङ्क्षायां तृणफूत्कारसहितेनेति । ततश्च तृणफूत्काराद्युपकृतेन पाकेन (तेजःसंयोगेन) ओदनं भावयेदिति वाक्यार्थः संपद्यते तद्वद्वेदेऽपि बोध्यम् ।

शाब्दी भावना

स एव लिङ्प्रत्ययो लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते । लोकेऽपि 'गामानय' इत्याचार्यवाक्यश्रवणानन्तरं अयमाचार्यो मां गवानयने प्रेरयति' इति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रवृत्तिकारणम् । प्रेरणाज्ञानस्य

टिप्प०–१ कथंभावाकाङ्क्षा नाम करणगतप्रकाराकाङ्क्षा. २ तप्रत्यय इत्यर्थः. ३ लिङ्त्वेन रूपेणेत्यर्थः. ४ पुरुषप्रवृत्त्यनुकूलभावकव्यापारविशेषः शब्दभावना.

पाठा०–1 भावनोपस्थितिः. 2 न्वाधानत्रीह्यवहननादि.

चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यत इति वेदेऽपि तत्रैव शक्तिकल्पनौचित्यात्। **इयांस्तु विशेषः**—लोके गवानयनादिप्रवृत्त्यनुकूलप्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावाल्लिङादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते। अत एव शब्दनिष्ठव्यापारत्वाच्छाब्दी **भावनेत्युच्यते**। यागहोमादिविषयप्रवृत्तिहेतुत्वात् **प्रवर्तना प्रेरणेति** चोच्यते।

सैषा शाब्दी भावनापि अंशत्रयविशिष्टा। तत्र पुरुषप्रवृत्तिरूपार्थभावना भाव्यत्वेनान्वेति। अध्ययनावगतलिङादिकं करणत्वेनान्वेति। अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति। तत्र 'साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद्व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थं[1] स्वकर्तव्यत्वेन बुद्ध्वा यागादीननुतिष्ठेयुः' इति शाब्दभावनाबोधः। अनुतिष्ठेयुः, अनुष्ठानं कुर्युरित्यर्थः। अनुष्ठानं प्रवृत्तिः। तेन पुरुषप्रवृत्तेः शाब्दभावनाभाव्यत्वमक्षतम्।

इयं च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु स्वरूपेण प्रतीयमाना कर्तव्यत्वेन न प्रतीयते। अर्थभावनाया एव तेषु कर्तव्यत्वावगमात्, किंतु 'स्वाध्यायोऽध्येतव्यः' इति वाक्य एव कर्तव्यत्वेन प्रतीयते। **नचात्रार्थभावनाया एव विधेयत्वमिति वाच्यम्।** 'स्वाध्यायोऽध्येतव्यः' इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्थशब्दभावनारूपत्वात्।

तथा हि—अधिपूर्वकात् 'इङ् अध्ययने' इति धातोः कर्मणि तव्यप्रत्ययो विहितः। कर्म च स्वाध्यायः प्रधानम्। [2]तत्संस्कारकमध्ययनं गुणकर्म। व्रीहिसंस्कारकप्रोक्षणादिवत्। अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकं[3] यागादिरूपार्थज्ञानं तदेव दृष्टत्वात्, तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयःसाधनत्वाच्च प्रयोजनम्। कर्मावबोधं विना कर्मानुष्ठानायोगात्। न त्वदृष्टं प्रयोजनम्; दृष्टफले

पाठा०—1 यागाद्यर्थस्य. 2 तत्संस्कारोऽध्ययनं. 3 °नौपयिकयागा°.

संभवत्यदृष्टफलकल्पनाऽयोगात्। **तथा च** स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शाब्दभावना अंशत्रयविशिष्टाः कर्तव्यत्वेन विधीयन्ते। साङ्गवेदाध्ययनेन व्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादि[1]कर्तव्यतां बुद्ध्वा यागादीननुतिष्ठेयुरिति। अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः। तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करणत्वेनान्वयात्, प्राशस्त्यज्ञानस्येतिकर्तव्यतात्वेनान्वयात्, शब्दभावनाया अपि अंशत्रयवैशिष्ट्यमर्थभावनाया इवेष्टम्।

तत्र समीहितस्वर्गादिभाव्यकत्वभानमपि विधिवशादेव। प्रवर्तनापरो विधिः यागादेः पुरुषार्थासाधनत्वे तत्र पुरुषं प्रवर्तयितुं न शक्नोतीति स्वभाव्यपुरुषप्रवृत्तिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वस्य प्रवर्तनापरत्वमेव न स्यात्। प्रवृत्तिहेतुव्यापारस्यैव प्रवर्तनात्वात्। लडादिस्थले तु प्रवर्तनात्मकविधेरभावादार्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति।

भावनाशब्दार्थः

भावनात्वं नाम [2]भवितुः प्रयोजकव्यापारत्वम्। तत्रार्थभावनायां भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वाल्लक्षणसङ्गतिः। शाब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वाल्लक्षणसङ्गतिः।

ज्योतिष्टोमादिशब्दानां नामत्वप्रतिपादनम्

ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वय इति चेत्,—न; भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात् 'ज्योतिष्टोमनामकेन यागेन' इति।

कथं तन्नामत्वमिति चेत्, ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन्सन्तीति व्युत्पत्त्या। यागस्य त्रिवृदादिस्तोमसंबन्धः केनावगम्यत इति चेत्, 'त्रिवृत् पञ्चदश सप्तदश स्तोमाः' इति वाक्यान्तरेण; एतच्छब्दार्थस्य तत्संबन्धावगमात्। एवं शास्त्रोक्तैस्तत्प्रख्यादिभिर्हेतुभिस्तत्र तत्र नामत्वं बोध्यम्।

पाठा०–1 कर्तृतां. 2 भवितुर्भवनानुकूलप्रयोजक.

नामधेयनिमित्तानि

शास्त्रे हि तत्प्रख्य-तद्व्यपदेश-यौगिक-वाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम् ।

तत्प्रख्यन्यायेन नामत्वम्

तथा हि—'अग्निहोत्रं जुहोति' इत्यत्र अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते, 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' इति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् । किंतु अग्निप्रख्यापकं [अग्निप्रापकं] यच्छास्त्रान्तरं 'अग्निर्ज्योतिर्ज्योतिरग्निः' इत्यादिकं, तेन प्राप्तमग्निसंबन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम् । नच होमस्य प्रत्ययवाच्यार्थभावनायां करणत्वात् तन्नामत्वे 'अग्निहोत्रेण' इति तृतीया स्यात्, 'ज्योतिष्टोमेन' इतिवदिति वाच्यम्; द्वितीयाया एव लक्षणया करणार्थकत्वात्, 'नासाधितं करणम्' इति न्यायेन असाधितस्य करणत्वायोगात् अर्थात्प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायादत्र नामधेयत्वम् ।

तद्व्यपदेशन्यायेन नामत्वम्

तथा 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनपदं यागनामधेयं, नतु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः । 'यथा ह वै श्येनो निपत्यादत्ते एवमेवायं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात् । 'श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामकः कर्मविशेषो भ्रातृव्यं शत्रुं निपत्यादत्ते' इति व्यपदेशः[2] कर्मनामत्वपक्ष एव युज्यते । यागाङ्गतया श्येनपक्षिविधौ तु स्वस्य स्वेनैवोपमानोपमेयभावः स्यात्, स चायुक्तः[3] । तस्माच्छ्येनतुल्यताव्यपदेशाच्छ्येनपदं कर्मनामधेयम्; ततश्च 'अभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेत्' इति वाक्यार्थः ।

नन्वेवमप्यभिचारस्यापि वेदोक्तत्वादाभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेत्,—न; वेदोक्तोऽप्यभिचारो वेदविहितो न भवति,

टिप्प०—१ अग्निहोत्रं जुहोतीत्यत्र. २ व्यपदेश उपमानम्. ३ उपमानोपमेयभावस्य भिन्ननिष्ठत्वात्तस्यायुक्तत्वम्.

फलत्वात्। 'फलं न विधेयं किंतु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयम्' इति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम्।

योगेन नामत्वम्

एवं 'उद्भिदा यजेत पशुकामः' इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भित्पदं[1] नामधेयम्, नतु यथाकथंचित्प्राप्तयागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिः। दध्यादिवदुद्भिन्नामकस्य गुणस्याप्रसिद्धत्वात्। यागे तु 'उद्भिद्यते फलमनेन' इति योगसंभवाद्यागनामत्वम्।

ननु 'उद्भिद्यते भूमिरनेन' इति योगवशेन खनित्रादावप्युद्भिदः प्रयोगसंभवात् खनित्रादिगुणविधिः किं न स्यादिति चेत्,—न; एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते। **विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात्**।

विरुद्धत्रिकविचारः

तथा हि—'उद्भिदा यजेत पशुकामः' इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासंभवात्, पशुकर्मकभावनायां करणत्वेन यागो विधेयः—'यागेन पशून्भावयेत्' इति। ततश्च यागस्य विधेयत्वम्। फलं प्रति च शेषतया प्रतीयमानत्वाद्गुणत्वम्। शेषतया अङ्गतयेत्यर्थः। फलसिद्ध्यर्थं पुंसाऽनुष्ठीयमानत्वादुपादेयत्वमिति **विधेयत्व–गुणत्वोपादेयत्वात्मकमेकं त्रिकं** यागेऽस्ति। तथा यागोद्देशेनोद्भिद्गुणविधौ विधित्सितगुणापेक्षया **प्राधान्यम्–उद्देश्यत्वम्–अनुवाद्यत्वं** चेति द्वितीयं त्रिकम्। तदेतत् त्रिकद्वयं परस्परविरुद्धमेकस्मिन्यागे प्रसज्येत; अतो न गुणविधिः।

नच 'सोमेन यजेत' इत्यत्र विरुद्धत्रिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामङ्गीकृत्य 'सोमवता यागेनेष्टं भावयेत्' इति सोमविशिष्टयागविधानाद्यथा सोमरूपगुणविधिः, तद्वदुद्भित्पदस्यापि मत्वर्थलक्षणयोद्भिद्विशिष्टयागविधानादत्रोद्भिद्गुणविशिष्टयागविधिः स्यादिति वाच्यम्। सोमादौ गत्यन्तराभावात् मत्वर्थलक्षणया विशिष्टविध्यङ्गीकारात्। उद्भिदादौ नामत्वेन गतिसंभवाद्विशिष्टविध्यङ्गीकारायोगात्। तस्माद्योगवशादुद्भिदादीनां नामत्वम्।

पाठा०–1 तदिदं. 2 दिनामत्वं.

वाक्यभेदभयान्नामत्वम्

तथा 'चित्रया यजेत पशुकामः' इत्यत्र चित्रापदं (वाक्यभेद-भयात्) प्राजापत्ययागनामधेयम्। 'दधि मधु घृतमापो धानास्त-ण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यत्र 'तत्संसृष्टं प्राजापत्यम्' इति सामाना-धिकरण्याद्यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासंबन्धः श्रुतस्तेनानुमितो यागो विधीयते। विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेत' इति वाक्यं फलसंबन्धविधायकम्। तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वाच्चित्रापदं कर्मनामधेयम्। नतु 'अग्नीषोमीयं पशुमालभेत' इति वाक्यप्राप्तं पशुयागं 'यजेत' इत्यनूद्य चित्र-त्वस्त्रीत्वगुणद्वयविधानम्। मानान्तरप्राप्तं कर्मोद्दिश्य तत्रानेकगुणविधाने वाक्यभेदात्। तदुक्तम्—'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः' इति। मानान्तराप्राप्ते कर्मणि त्वनेकदेवताष्टाकपालपुरोडाशामावास्यापौर्ण-मास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासंबन्धेनानुमितो यागो विधीयत इति सिद्धान्तः। तदुक्तम्—'अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' इति

अथ—यथा 'पशुना यजेत' इत्यत्र मानान्तरप्राप्तयागमुद्दिश्य तदङ्गतय 'पशुना' इत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यानां त्रयाणां **वाक्यभेदं विनैव** विधिरङ्गीकृतः, तद्वदत्राप्येकपदोपात्तचित्रत्व-स्त्रीत्व-विशेषितपशु-द्रव्यकारकस्य विधानान्न वाक्यभेदः। अत एव तत्र विधेयस्य पशोरुपादे-यत्वात्तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमि**त्येकेनैव पशुना यष्टव्यम्**, 'ग्रहं संमार्ष्टि' इत्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः। कथं, 'ग्रहं संमार्ष्टि' इत्यत्र 'ग्रहम्' इति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्दे-श्यत्वात्, प्रयोजनत्वाच्च प्राधान्यं गम्यते। संमार्गस्तु ग्रहं प्रति गुणभूतः। 'प्रतिप्रधानं गुण आवर्तनीयः' इति न्यायात् 'यावन्तो ग्रहास्तेषां सर्वेषां संमार्गः' इति निश्चये सति, 'कति ग्रहाः संमार्जनीयाः' इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम्। **यद्युच्येत** नेदमुद्देश्यगतं किंतु स्वयं विधेयम्—'ग्रहं संमृज्यात्', 'यं संमृज्यात्तं चैकम्' इति। तथा सति विधेयभेदाद्वाक्यभेदः स्यात्। तथाबुभुत्साया

पाठा०—1 यद्युच्यते. 2 ग्रहं संमृज्यात्तं चैकं.

अभावात् विधानाऽयोगाच्चोद्देश्यगता संख्या न विवक्षिता[1]। उद्देश्यगतमपि विशेषणं किंचिद्विवक्षितं यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति। यथा—तत्रैव ग्रहत्वं विवक्षितम्। तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात्। तेन ग्रहजातीयसाधनकसोमयागापूर्वार्थत्वाच्चमसेषु न संमार्ग इति स्थितम्[2]।

'पशुना यजेत' इत्यत्र यागं प्रति पशुर्विधेयत्वाद्गुणभूतः। प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियद्भिः पशुभिः यागः कर्तव्य इत्याकाङ्क्षायां एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितं बुभुत्सितत्वात्[3]।

किंच लिङ्गसंख्याविशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वाद्विधेयपशुद्वारा तद्गतलिङ्गसंख्यादेरपि क्रियाङ्गत्वादेकत्वं विवक्षितम्। अथवा तृतीयया विभक्त्याऽभिहितयोर्लिङ्गसंख्ययोर्विभक्त्यभिहिततया करणकारकशक्त्याऽऽत्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण संबन्धमनादृत्य तद्वदेव साक्षात्क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः—यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्चेति।

यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्तिभिरारुण्यपिङ्गाक्षीत्वादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेनान्वये सति आरुण्यादेर्गुणस्यामूर्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीगोपरिच्छेदकत्वेन पश्चात् परस्परं पार्ष्णिकान्वयः—या एकहायनी गौः सा पिङ्गाक्षी अरुणेति[4] तद्वत्।

तदेवमुद्देश्यगतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्। एवं च चित्रापदेन चित्रत्वस्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेतिपदानूदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेत्[5],—न; तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसंबन्धाकाङ्क्षस्य

टिप्प०—१ पूर्वमीमांसातृतीयाध्यायप्रथमपादे सप्तमेऽधिकरणे. २ पूर्वमीमांसातृतीयाध्यायप्रथमपादेऽष्टमेऽधिकरणे. ३ पूर्वमीमांसाचतुर्थाध्यायप्रथमपादे पञ्चमाधिकरणे. ४ पूर्वमीमांसातृतीयाध्यायप्रथमपादे षष्ठेऽधिकरणे. ५ 'चित्रया यजेत पशुकामः' इत्यत्रत्येन.

हानम्, अप्रकृतस्याऽग्नीषोमीययागस्य कल्पना च स्यात्। तद्वयमयुक्तम्; तस्माच्चित्रापद कर्मनामधेयम्। एवं तत्प्रख्यादिभिरन्यतमेन सर्वत्र कर्मनामत्वमूह्यम्। इत्थं विधिवाक्यस्य प्रामाण्यं विचारितम्।

अर्थवादविचारः

अथार्थवादो विचार्यते। अर्थवादानां[1] तु स्वार्थपरत्वे प्रयोजनाभावाद्ध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यतया प्रामाण्यम्।

स च चतुर्विधः—निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात्।

तत्र **निन्दार्थवादो यथा**—'असत्रं वा एतद्यदच्छन्दोगम्', 'अश्रुजं हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सराद्बहे रुदन्ति' इत्यादिः।

प्रशंसा यथा—'शोभतेऽस्य मुखं य एवं वेद', 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्येवमादिः।

परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादकोऽर्थवादः **परकृतिः—यथा** 'अग्निर्वा अकामयत' इत्यादिः।

परप्रवक्तृकार्थादिप्रतिपादकः **पुराकल्पः, यथा**—'तमशपद्धिया धिया त्वा वध्यासुः' इत्यादिः।

तत्र निन्दार्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वम्। 'अश्रुजम्' इत्यादिरजतनिन्दाद्वारा च विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात्। इतरेषां त्रयाणां साक्षात्प्राशस्त्यपरत्वमेव। 'वायुर्वै' इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता, अतस्तद्दैवत्यं कर्म प्रशस्तमिति विधेयदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम्।

'अग्निर्वा अकामयत' इत्यस्य अग्निदैवत्यो यागः पूर्वकाले अग्निनाकृतत्वात्प्रशस्तः, आस्तिक्यादिदानीमप्यन्यैर्यजमानैरवश्यं कर्तव्य इति विधेयकर्मगतप्राशस्त्यद्वारा विध्येकवाक्यत्वम्। एवमन्यत्राप्यूह्यम्।

टिप्प०—1 प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः.

पाठा०—1 तत्प्रख्यादिभिरन्यतरेण. 2 विधिवाक्यैकवाक्यत्वम्. 3 आधिक्यादिदा.

क्वचित्कार्यान्तरमप्यस्ति; यथा—'अक्ताः शर्करा उपदधाति' इति विधौ 'अक्ताः' इति पदेन । द्रवद्रव्यसामान्यं प्रतीयते । तच्च द्रव्यं किमिति संदेहे 'तेजो वै घृतम्' इत्यर्थवादात् घृतमिति निश्चीयत इति, 'तेजो वै घृतम्' इत्यर्थवादस्य **संदिग्धार्थनिर्णायकत्वेन प्रामाण्यम्** । इत्यर्थवादविचारः ।

मन्त्रविचारः

अथ **मन्त्रविचारः** । मन्त्राणामप्यध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव, नत्वदृष्टार्थत्वम् । दृष्टे संभवत्यदृष्टकल्पनाऽयोगात् । प्रयोगकाले कर्मज्ञानं विना कर्मानुष्ठानायोगात् कर्मोपयिकमर्थज्ञानं मन्त्रैः क्रियते ।

न चोपदेष्टृवचनादिनाप्यर्थस्मरणसंभवादनुष्ठानोपपत्तिरिति वाच्यम् । मन्त्रैरेवार्थं स्मृत्वानुष्ठाने सति फलं संभवति नान्यथेति नियमाङ्गीकारात्, नियमेनादृष्टस्याङ्गीकारात्, तदभावे तज्जन्यादृष्टलोपे तन्मूलकं फलं न सिद्ध्यतीति कल्पनात् ।

नन्वेवं मन्त्राणां स्वप्रकाश्येऽर्थे विनियोग इति फलितम् । विनियोगो नाम शेषत्वेनान्वयः । शेषत्वं नामाङ्गत्वम् । ततश्च 'इमामगृभ्णन्रशनाम्' इति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिङ्गादेव रशनाग्रहणाङ्गत्वोपपत्तेः 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति वचनं किमर्थमिति चेत्,—न; परिसंख्यार्थत्वात् । चयनप्रकरणेऽश्वरशनाग्रहणं गर्दभरशनाग्रहणं चेति द्वयमस्ति । तत्र लिङ्गादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषाद्गर्दभरशनायामपि मन्त्रः प्राप्तः । अतोऽश्वरशनायामेव मन्त्रः कार्यो न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसंख्यार्थोऽयं विधिः ।

परिसंख्याया दोषत्रैविध्यम्

सा च **परिसंख्या त्रिदोषा—स्वार्थत्यागः, परार्थस्वीकारः, प्राप्तबाधश्चेति** भेदात् । 'अश्वाभिधानीमादत्ते' इति वाक्यस्य **अनेन** मन्त्रेणाश्वरशनाऽऽदानं कुर्यादिति **स्वार्थः**, स च त्यक्तः । गर्दभरशनातो मन्त्रनिवृत्तिः **परार्थः**, स च स्वीकृतः । गर्दभरशनायामपि लिङ्गात्**प्राप्तस्य** मन्त्रस्य अनेन **बाधश्च**—इति त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता । गत्यन्तरे सति सा न युक्ता ।

विकल्पः

एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः । **यथा**—यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः। तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायामनियमेन यस्यकस्यचिद्द्रव्यस्य प्राप्तौ 'व्रीहिभिर्यजेत' इति वाक्याद्व्रीहयो नियम्यन्ते, एवं 'यवैर्यजेत' इति वाक्याद्यवा अपि नियम्यन्ते; तयोरेकार्थत्वाद्विकल्पः ।

एवं 'अतिरात्रे षोडशिनं गृह्णाति' इत्यतिरात्रे षोडशिग्रहो विहितः । तथा 'नाऽतिरात्रे षोडशिनं गृह्णाति' इति प्रतिषेधाद्ग्रहणाभावो विहितः । तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेकस्मिन्प्रयोगेऽनुष्ठातुमशक्यत्वात्कचित्प्रयोगे ग्रहणानुष्ठानम्; प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः ।

विकल्पे दोषाष्टकम्

स चाष्टदोषदुष्टः । तथा हि—पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः १ । अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः २ । ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत्प्रामाण्यं तत्स्वीकारः ३ । स्वीकृतं यदप्रामाण्यं तत्परित्याग ४ श्चेति **यवशास्त्रे चत्वारो दोषाः** । एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत्प्रामाण्यं तत्परित्यागः ५ । अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः ६ । पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः ७ । स्वीकृताप्रामाण्यपरित्याग-८ श्चेति **व्रीहिशास्त्रे चत्वारो दोषाः** इत्यष्टदोषदुष्टो विकल्पः ।

स च विकल्पः क्वचिदेकार्थत्वात्; एककार्यकारित्वादित्यर्थः । यथा व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः ।

क्वचिद्वचनबलात्; यथा—'बृहत् पृष्ठं भवति' इति बृहत् सामसाध्यं पृष्ठनामकं स्तोत्रं विहितम्, 'रथन्तरं पृष्ठं भवति' इति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते ।

स्तोत्रं च प्रयाजादिवदपूर्वार्थत्वादर्थकर्म । साम तु संस्कारकर्मत्वाद्गुणकर्म । स्तोत्रसाधनीभूतस्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा

पाठा०—1 स्तोत्रं विहितं. 2 संस्कारत्वात्.

साम्नां स्तोत्रसाधनत्वाङ्गीकारात् । प्रगीतमन्त्रसाध्यमिन्द्रादिगुणनिष्ठ-गुणाभिधानं **स्तोत्रम्**; प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्य-मित्यर्थः । अप्रगीतमन्त्रसाध्यगुणनिष्ठगुणाभिधानं **शस्त्रम्** । गान-क्रियाविशेषः **साम** । स्तोत्रसाधनीभूता ऋचः **स्तोत्रीयाः** । तदे-तत्त्रिवृत्पञ्चदशत्वादिसंख्याविशेषः **स्तोम** इत्येतेषां भेदः । **तथा च** बृहद्रथन्तरपृष्ठयोर्भिन्नापूर्वार्थत्वेन एकार्थत्वाभावेऽपि 'बृहद्वा पृष्ठं कार्यं, रथन्तरं वा पृष्ठं कार्यम्' इति वचनबलादेव विकल्पः ।

क्वचिद्व्यवस्थितविकल्पः । द्वितीयप्रयाजादिकर्मणि नाराशंस-तनूनपान्मन्त्रयोरेकार्थत्वाद्विकल्पः । स च 'राजन्यवसिष्ठादीनां नारा-शंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्' इति वाक्याद्व्यवस्थित इति **व्यवस्थितविकल्पः** ।

कृत्स्नवेदस्य धर्माधर्माख्यार्थे प्रामाण्यम्

तदेवं चोदनापरपर्यायाणां विधिवाक्यानामंशत्रयविशिष्टभावनाविधा-यकत्वात्प्रामाण्यम्, उद्भिदादीनां नामतया, अर्थवादानां विधेयप्राशस्त्य-परतया, मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्या-लौकिके धर्माधर्माख्येऽर्थे प्रामाण्यं स्थितम् ॥ इति वेदप्रामाण्यविचारः ।

अथ स्मृत्यादिप्रामाण्यविचारः । मन्वादिप्रणीतानां स्मृतीना-मपि वेदमूलकत्वात्स्यादृष्टकादौ धर्मे प्रामाण्यम् । 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिरप्रमाणम्, 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्ष-श्रुतिविरुद्धत्वात् । सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्तुमशक्यत्वात् । 'वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति' इत्यादिस्मृतिरप्रमाणम्, श्रुत्यर्था-विरुद्धत्वेऽपि लोभमूलकत्वात् ।

तथा **शिष्टाचारो**ऽपि स्मृतिद्वारा श्रुतिमूलकत्वात्प्रमाणम् । मातुल-सुतापरिणयनादिशिष्टाचारस्त्वप्रमाणम् । 'मातुलस्य सुतामूढ्वा मातृगोत्रां

टिप्प०–१ यद्यप्यत्र शिष्टाचारोऽप्रमाणमित्युक्तं, तथापि शतपथे दार्शिकप्रकरणे पठ्यते–'तस्मात्—समानादेव पुरुषादत्ता चाद्यश्च जायते उत तृतीये संग-च्छावहै चतुर्थे संगच्छावहै' इति । अत्र कूटस्थादुत्पन्नयोर्भोक्तृभोग्ययोर्मिथः संकल्पोक्तिस्तृतीये इत्यादिका । तद्वशाच्च सापिण्ड्यसंकोच इति **माधवः** । एवं 'आयाहीन्द्र पथिभिः' इति बह्वृचां मन्त्रे 'तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्व-

तथैव च। समानप्रवरां तद्वत्यक्त्वा चान्द्रायणं चरेत्' इत्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात् तदेवं श्रुतिस्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तम्।

धर्मस्य परस्परं भेदकानि प्रमाणानि

स च धर्मः **परस्परं भिन्नः**। भेदकप्रमाणानि तु शब्दान्तरादीनि।

तथा हि—याग-दान-होमानां यजति-ददाति-जुहोतीत्यपर्याय-शब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः। स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं **दानम्**।

'समिधो यजति' इत्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वम्, अन्येषां तस्मिन्कर्मणि गुणविधायकत्वम्, इत्यत्र नियामकाभावात्सर्वेषां कर्मविधायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानं व्यर्थमिति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्यविहितस्य कर्मणो भेदः सिद्ध्यतीत्येतादृशस्थलेष्वविशेषपुनःश्रुतिरूपात् 'यजति'पदाभ्यासात् **कर्मभेदः**।

'तिस्र आहुतीर्जुहोति' इत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसंख्यान्वयात्परस्परं भिन्नास्त्रयो होमा इति **संख्ययाऽत्र कर्मभेदः**।

'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत' इति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिरास्यानां त्रयाणां यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक्संज्ञाकरणाज्ज्योतिष्टोमापेक्षया भेदः। भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति **संज्ञया कर्मभेदः**।

सेयी वपामिव' इति मातुलकन्यादेर्भागिनेयादिं प्रति भागत्वोक्त्या परिणयनसूचनात्सापिण्ड्यसंकोचाङ्गीकारेण मातुलकन्यादिपरिणयने इदं मन्त्रलिङ्गमपि साधकम्। इदं च 'मातुलस्य सुतामूढ्वा' इति स्मृत्यपेक्षया बलवदिति बलाबलाधिकरणवार्तिककव्याख्यावसरे न्यायसुधाकार उक्तवान्। 'वेदाच्चैतत्प्रतीयते' इत्यत्र सर्वनाम्ना पूर्वार्धनिर्दिष्टदेशकुलानुसारिण एव सापिण्ड्यसंकोचस्य परामर्शात्तदनुसरणमपि वेदोक्तमिति ज्ञाप्यते। तथा च स्वकुलदेशाविरोधिना मातुलदुहितृपरिणयनादेरुक्तविधयानेकश्रुतिस्मृतिसिद्धत्वात्प्रामाण्यं सिद्धम्। **सं. कौ. १ अत्र अभ्यास-संख्या-संज्ञा-गुण-नामधेय-प्रकरणान्तराण्यादिशब्दाज्ज्ञेयानि.**

तथा 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र 'सा वैश्वदेवी' इतिवाक्ये विश्वदेवदेवताऽऽमिक्षाद्रव्यसंबन्धानुमितो यागो विधीयते। 'वाजिभ्यो वाजिनम्' इत्यत्रापि वाजिदैवत्यं वाजिनद्रव्यकं कर्मान्तरं विधीयते। नतु पूर्वविहिते वैश्वदेवयागे वाजिनद्रव्यरूपो गुणो विधीयते। पूर्वयागस्यामिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात्। **नच** व्रीहियववद्विकल्पः। वाजिनामिक्षयोः समशिष्टत्वाभावात्। विषमशिष्टयोर्विकल्पायोगात्। वैश्वदेवयागोत्पत्तिवाक्य एवामिक्षागुणः शिष्यत इत्युत्पत्तिशिष्टः; शिष्यते विधीयत इत्यर्थः। वैश्वदेववाक्यादुत्पन्ने कर्मणि वाक्यान्तरेण शिष्टो वाजिनगुण उत्पन्नशिष्टः, तयोर्मध्ये श्रुत्पत्तिशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात्। उत्पन्नशिष्टो वाजिनगुणोऽनन्तरं प्रमितोऽपि विलम्बितत्वेन दुर्बलत्वात्पूर्वकर्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसंबन्धात् स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति **गुणाद्भेदः**। तत्र घनीभूतं पय आमिक्षा, शिष्टं जलं वाजिनम्।

तथा कुण्डपायिनामयने श्रूयते—'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इति। अत्र पूर्वं कर्म किंचिदपि संनिहितं न भवति अपूर्वकर्मसंनिधानरूपात्**प्रकरणान्तरात्**प्रसिद्धाग्निहोत्रधर्मकं तन्नामकं कर्मान्तरं विधीयते। नत्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः। प्राप्ते कर्मणि आनन्तर्य—मासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति **प्रकरणान्तरादत्र कर्मभेदः**। प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रम्, नित्याग्निहोत्रमिति यावत्। तदेवं शब्दान्तरा-भ्यास-संख्या-संज्ञा-गुण-प्रकरणान्तरैः कर्मभेदो दर्शितः। इति कर्मभेदनिरूपणम्॥

टिप्प०—१ वैश्वदेव्यामिक्षेत्यत्र वैश्वदेवीशब्दस्य देवतातद्धितान्तत्वात्तद्धितस्यच 'सास्य देवता' इति सर्वनामार्थे स्मरणात्, सर्वनाम्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वम्। तत्र कोऽसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायामामिक्षापदसांनिध्यादामिक्षारूपो विशेष इत्यवगम्यते। यथाहुः—'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः। आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम्॥' इति। तथा—श्रुत्यैवोपपदस्यार्थः सर्वनाम्ना प्रतीयते। तदर्थस्तद्धितेनैवं त्रयाणामेकवाच्यता॥ इति. २ विधीयत इत्यर्थः।

पाठा०—1 कत्वर्थत्वात् यथा.

प्रमेयविचारः

अथ **प्रमेयादिविचारः**। तत्र **वेदादिप्रमेयोऽर्थस्त्रिविधः**—**क्रत्वर्थः, पुरुषार्थः, उभयार्थश्चेति**। तत्र प्रयाजादिकं केवलं **क्रत्वर्थः**, फलं तत्करणं च **पुरुषार्थः**—यथा ज्योतिष्टोमादिः, स्वर्गश्च ॥ दध्यादि **तूभयरूपं**—'दध्ना जुहुयात्' इति फलासंयुक्तवाक्येन [1]**क्रत्वर्थत्वात्** 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यनेन फलाय विधानात्**पुरुषार्थत्वात्**। तदुक्तं—'एकस्य [2]तूभयरूपत्वे संयोगपृथक्त्वम्' इति। **संयोगो** वाक्यं तस्य पृथक्त्वं भेदः। स चैकस्य उभयार्थत्वे नियामक इत्यर्थः।

प्रयोजकत्वविचारः

क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः। पुरुषार्थे फलं **प्रयोजकम्**। **प्रयोजकत्वं** नामानुष्ठापकत्वमित्यर्थः।

विधिर्यदर्थं यदनुष्ठापयति स तत्र **प्रयोजकः**। **दर्शादिविधिः** स्वर्गार्थं दर्शादिकमनुष्ठापयतीति स्वर्गादिर्दर्शादौ प्रयोजकः। प्रयाजादिविधिः प्रयाजान्दर्शार्थं अनुष्ठापयतीति दर्शादिः **प्रयाजानां** प्रयोजकः। दध्यानयनविधिः दध्यानयनमामिक्षार्थमनुष्ठापयति, न वाजिनार्थम्। आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतः-सिद्धत्वात्। अत आमिक्षैव दध्यानयने प्रयोजिका, न वाजिनम्।' 'पुरोडाशकपालेन तुषानुपवपति' इति तुषोपवापाङ्गत्वेन पुरोडाशकपालं विधीयते, तथापि तुषोपवापः कपालस्य प्रयोजको न भवति, पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवापसिद्धेः, किंतु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम्। इति प्रमेयादिनिरूपणम्॥

क्रमनिरूपणम्

अथ **क्रमनिरूपणम्**। **ननु** विधिना साङ्गं प्रधानं कर्तव्यतया चोद्यते। तत्राङ्गानां प्रधानानां च कर्मणां बहुत्वात्क्रमेणानुष्ठानं वाच्यम्। तत्क्रमनियामकं प्रमाणं किमिति चेत्,—न; [3]**श्रुत्यादीनामेव** क्रमनियामकत्वात्।

टिप्प०–१ उभयत्वमुभयरूपत्वम्. पूर्वमीमांसायाश्चतुर्थाध्याये तृतीयपादे चतुर्थं सूत्रम्. २ श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्त्याख्यानाम्। एषु च पूर्वं पूर्वं बलीयः.

पाठा०–1 क्रत्वर्थत्वात् यथा।

श्रुतिक्रमः

तथा हि—'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इत्यत्र क्त्वाश्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति **श्रौतक्रमः** ।

अर्थक्रमः

'अग्निहोत्रं जुहोति, यवागूं पचति' इत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात्पूर्वं होमस्य कर्तुमशक्त्यत्वात् पाठक्रमं त्यक्त्वाऽर्थक्रमः स्वीकर्तव्यः । अर्थः प्रयोजनं होमादिरूपं तदर्थं क्रमः **अर्थक्रमः** । तेन पूर्वं पाकः पश्चाद्धोमः ।

पाठक्रमः

'समिधो यजति', 'तनूनपातं यजति' इत्यादौ विधिवाक्यपाठक्रमादेव समिदादियागानुष्ठानक्रमः ।

स्थानक्रमः

तथा ज्योतिष्टोमे औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानां अग्नीषोमीय-सवनीया-नुबन्ध्यानां पशूनां त्रयाणां साद्यस्कार्ये सोमयागे 'सह पशूनालभेत' इत्येकदाऽनुष्ठानलक्षणं साहित्यं बोधितम्, तदपि सवनीयस्य **स्थाने** विहितम् । तत्र प्राकृतक्रमं परित्यज्य सवनीयस्य स्थाने साहित्यविधानादादौ सवनीयपशोरुपाकरणम्, ततोऽग्नीषोमीयस्य, ततोऽनुबन्ध्यायाः इति **स्थानात्क्रमः** । सुत्यादिवसात्पूर्वमहरौपवसथ्यम् ।

मुख्यक्रमः

तथा दर्शे सांनाय्यधर्माणां शाखाच्छेदादीनां पूर्वम्, आग्नेयधर्माणां निर्वापादीनां च अनन्तरं प्रवृत्तावपि मुख्ययोराग्नेयसांनाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेणादावाग्नेयपुरोडाशस्य प्रयाजशेषाभिघारणम्, ततः पयसोऽभिघारणम्, इति मुख्ययागक्रमादभिघारणक्रमः ।

टिप्प०–१ प्रयाजशेषेण घृतेनाभिघारणमित्यर्थः. २ उपाकरणं देवतार्थत्वेन स्वीकरणम् । उपाकरणनियोजनप्रभृतीनां साहित्यं संपादनीयम् । तत्र प्राजापत्यानां संप्रतिपन्नदेवताकत्वेनैकस्मिन्काले ऽनुष्ठानादुपपद्यते साहित्यम्, तदज्ञानां चैकस्मिन्काले ऽनुष्ठानमशक्यम् । नह्यनेकेषां पशूनामुपाकरणमेकस्मिन्काले कर्तुं शक्यम् । अतस्तेषां साहित्यमव्यवधानेन संपाद्यम् । अत एकस्योपाकरणं कृत्वा द्वितीयस्योपाकरणमिति प्राजापत्येष्वेकं पदार्थं सर्वत्रानुष्ठाय द्वितीयपदार्थोऽनुष्ठेयः.

प्रवृत्तिक्रमः

तथा 'सप्तदश प्राजापत्यान् पशूनालभते' इत्यत्र सप्तदशपशुद्रव्यक-प्रजापतिदेवताकाः सप्तदश यागाः कर्तव्यत्वेन बोधिताः, तत्रोपाकरणाख्य आद्यः पदार्थो यतः कुतश्चिदारभ्य यत्र क्वचित् समामनीयः । नियोजनादिकं तु येन क्रमेण उपाकरणं प्रवृत्तं तेनैव क्रमेण कर्तव्यम् । कथम्—प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव नियोजनम्, तृतीयक्षण एव प्रोक्षणम्, व्यवधानप्रयोजकाभावात् । अत्र तु सप्तदशपशूनां सहानुष्ठेयत्ववचनात्प्रथममतो यत्र क्वचित्पशौ कृतमुपाकरणं स्वाश्रयकर्तव्यनियोजनाय षोडशभिः क्षणैर्व्यवधानं सहते, न त्वधिकम् । तत्रोपाकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरे नियोजनं कृत्वाऽनन्तरं प्रथमपशौ नियोजनकरणे षोडशक्षणाधिकक्षणव्यवधानं शास्त्राननुमतमापद्येत । तन्निरासायोपाकरणं येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कार्यमिति **प्रवृत्तिक्रमः** ।

इत्येवं श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिक्रमैरेव कर्मानुष्ठानम् । अन्यथानुष्ठाने वैगुण्यमित्यलम् ॥

इति श्रीकृष्णयज्वकृता **मीमांसापरिभाषा समाप्ता** ॥

टिप्प०-१ स्वमुपाकरणम्. २ सहप्रयुज्यमानेषु प्रधानेषु संनिपातिनामज्ञानावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः.